# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०२ सेमेस्टर-०३** | **प्रश्नपत्रम्- ०५** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – CC 235 | समयः –२:०० तः ०५:०० |
| दिनाङ्कः – ०८/१२/२०१८ | ग्रन्थः – याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः ) | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या विधेया। १०**

(१) अशीतिभागो बुद्धिः स्यान्मासि मासि सबन्धके।
वर्णक्रमाच्छतं द्वित्रिचतुष्पञ्चकमन्यथा॥

(२) श्रुताध्ययनसपन्ना धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥

(३) प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्।
एषा-मन्यतमाभावे दिव्यान्यतममुच्यते॥

**प्रश्नः २ अधोलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखित। १०**

(१) यथाशास्त्रं ऋणदानसम्बन्धितनियमान् विलिख्य
आधुनिककाले तेषां योगदानं वर्तते न वा विवेचयत।

(२) लेख्यप्रकरणस्य विषयवस्तु प्रस्तूयताम्।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधस्तनेषु द्वयोः व्याख्या विधेया। १०**

(१) तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम्।
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा॥

(२) यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा॥

(३) पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्।
आधिवेदनिकाद्यं च स्त्रीधनं परिकीर्तितम्॥

**प्रश्नः ४ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखित। १०**

(१) सीमाविवादप्रकरणस्य सारांशः प्रस्तूयताम्।

(२) यथाशास्त्रम् अग्निविधिं निरूपयत।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु द्वयोः श्लोकयोः व्याख्या विधेया।** **१०**

(१) पतनीयकृते क्षेपे दण्डो मध्यमसाहसः।
उपपातकयुक्ते तु दाप्यः प्रथमसाहसम् ॥

(२) संभूय कुर्वतामर्घं संबाधं कारुशिल्पिनाम्।
अर्घस्य ह्रासं वृद्धिं वा जानतो दम उत्तमः ॥

(३) ग्राहकैर्गृह्यते चौरो लोत्त्रेणाथ पदेन वा।
पूर्वकर्मापराधी च तथा चाशुद्धवासकः ॥

**प्रश्नः ६ एकस्य निबन्धात्मकमुत्तरं लिखित।** **१०**

(१) साहसप्रकरणम्।

(२) दण्डपारूष्यप्रकरणम्।

**प्रश्नः ७ अधस्तनेषु केषाञ्चिद् दश प्रश्नानाम् अतिलघूत्तरं लिखित।** **१०**

(१) याज्ञवल्क्यस्मृतौ कति अध्यायाः सन्ति ?
(२) राज्ञः परमो धर्मः कः ?
(३) किं नाम प्रमाणम् ?
(४) साक्षी कतिविधः ?
(५) लेख्यं कतिविधम् ?
(६) कतिविधं मानुषं प्रमाणम्?
(७) ' दाय ' शब्देन किं ज्ञायते ?
(८) दिव्यानां नामानि लिखत।
(९) मातृकृतमृणं केन अपाकरणीयम् ?
(१०) औरसपुत्रस्य लक्षणं किम्?
(११) क्षेत्रजपुत्रस्य लक्षणं किम् ?
(१२) पौनर्भवपुत्रस्य लक्षणं किम्?
(१३) दत्तकपुत्रस्य लक्षणं किम् ?
(१४) 'सीमाः' कति विधाः ? का च ताः ?
(१५) साहसं कतिविधम् ?

***